# Jyotirvidya Vivekah

# જ્યોતિર્વિદ્યાવિવેકઃ

## Document Information

Text title : Jyotirvidya Vivekah

File name : jyotirvidyAvivekaH.itx

Category : misc, sahitya, article, pradIptakumArananda

Location : doc_z_misc_general

Author : (Copyright) Pradipta Kumar Nanda, Kendrapara, Orissa pknanda65 at gmail.com

Transliterated by : Pradipta Kumar Nanda

Proofread by : Pradipta Kumar Nanda

Acknowledge-Permission: (Copyright) Pradipta Kumar Nanda

Latest update : May 13, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 14, 2021

*sanskritdocuments.org*

Jyotirvidya Vivekah

# જ્યોતિર્વિદ્યાવિવેકઃ

લેખકઃ - નન્દપ્રદીપ્તકુમારઃ

સિદ્ધાન્ત-સંહિતા-હોરારૂપસ્કન્ધત્રયાત્મને ।
નમો જ્યોતિઃ સ્વરૂપાય નિગમાગમચક્ષુષે ॥

ઇદં સંસ્કૃતવાઙ્મયં વિશ્વવાઙ્મયસમુદાયે મૂર્દ્ધન્યમિતિ વચનં સર્વથા યુક્તિયુક્તં સત્યઞ્ચ । અસ્ય સર્વાંગપૂર્ણં કલેવરં સર્વાનપિ વિશ્વજનાન્ વિસ્માપયતીતિ નૈવાત્યુક્તિઃ । વેદસ્ય ષડંગેષુ જ્યોતિષં હિ નયનમિતિ સ્તિરીકૃતમ્ । યચ્ચોક્તં ભાસ્કરાચાર્યૈઃ-
"વેદચક્ષુઃ કિલેદં સ્મૃતં જ્યોતિષં મુખ્યતા ચાંગમધ્યેઽસ્ય તેનોચ્યતે ।
સંયુતોઽપીતરૈઃ કર્ણનાસાદિભિઃ ચક્ષુષાંગેન હીનો ન કિઞ્ચિત્કરઃ" ॥

ઇતિ । અન્યત્ર લગધેનાપિ અસ્ય શ્રેષ્ઠત્વં પ્રમાણીકૃતમ્ । યથોક્તં-
"યથા શિખા મયૂરાણાં નાગાનાં મણયો યથા ।
તદ્વત્વેદાંગશાસ્ત્રાણાં જ્યોતિષં મૂર્ધ્નિ સંસ્થિતમ્"॥ (વે. જ્યૌ। -૪)
અનેન શુભાશુભફલકથનપુરઃસરં શાસ્ત્રમિદં મહત્વપૂર્ણં વરીવર્તિ । તિથિવારમુહૂર્તાદિકં જ્ઞાતું યજ્ઞીયકાર્યે ઉપયુક્તસમયનિર્ધારણે ચ અસ્ય પ્રયોજનં મુખ્યમેવ પ્રતિભાતિ । નિખિલેઽસ્મિન્ ગગનમણ્ડલે યાનિ તેજોમયાનિ ગ્રહ-નક્ષત્રવિમ્બાનિ ગતિમયાનિ દૃશ્યન્તે તાનિ સમષ્ટિરૂપેણ જ્યોતિઃ શબ્દેનોચ્યન્તે । તેષુ સદૈકરૂપગતીનિ નક્ષત્રાણિ । દૈનિકભિન્નગતિયુક્તાનિ તુ ગ્રહસંજ્ઞકાનિ જ્યોતીંષિ ભવન્તિ । અન્યાર્થેન સૂર્યાદીનાં ગતિરેવાત્ર જ્યોતિઃ । જ્યોતિસ્ શબ્દાન્મત્વર્થીયે

અચિ પ્રત્યયે કૃતે જ્યોતિષશબ્દો નિષ્પન્નો જાતઃ । તદધિકૃત્ય કૃતો ગ્રન્થો જૌતિષઃ સૂર્યસિદ્ધાન્તાદિઃ । તદધીતે તદ્વેદ વા જ્યૌતિષિકઃ । કેચિજ્જ્યોતિર્વિદ્યારૂપેઽર્થે જ્યોતિષમિતિ શબ્દં રૂઢમિતિ વદન્તિ । આકાશીયજ્યોતિષુ દૃશ્યાદૃશ્યમાનેષુ કેચન અમૃતમયકિરણાઃ, કેચિદ્વિષમયકિરણાઃ, અપરે કેચિદુભયમિશ્રકિરણાઃ, કેચિચ્ચ ઉભયધર્મહીનકિરણાઃ સ્મૃતાઃ । એવંવિધનક્ષત્રગ્રહતારકાદિજ્યોતિઃપુઞ્જાનાં સ્થિતિ-ગતિ-પ્રભાવાદિવર્ણનાત્મકં ખલુ જ્યોતિષશાસ્ત્રં વેદાંગત્વેન સ્થિરીકૃતં ભારતીયૈઃ વિદ્વભિઃ । માનવઃ સર્વદા સુખમભિલષતિ । તદીયં સમસ્તકાર્યં સફલં ભવતુ શુભે સમયે ભવતુ ઇત્યભિલાષં તસ્ય મનસિ યદા જાતં તદા તેન જ્યોતિઃશાસ્ત્રમન્વેષીકૃતમ્ । કેનોપાયેન અનિષ્ટકારિણ્યો દારુણા ઘટિકાઃ તં ન નિપાતયેયુઃ તં પ્રતિ આશંકાં ન સઞ્ચારયેયુઃ ઇતિ વિષયે કૃત્સ્નતયા જ્ઞાનમધિગન્તું તસ્ય સર્વદા ઇચ્છા બલવતી જાતા, યેન ગ્રહાદિજનિતબાધાઽઽગમનાત્ પ્રાગેવ

તત્પ્રતિબન્ધકરૂપકં જ્ઞાનં લબ્ધું તેન સર્વદા સંચેષ્ટ્ય માનવજીવને જ્યૌતિષસ્ય આવશ્યકતા સ્થિરીકૃતા નિશ્ચિતા । કસ્મિન્ સમયે કા ઘટના ઘટેત્, કદા વિપદઃ સમ્ભાવનાસ્તિ, કદા ભાગ્યોદયો ભવેત્, કદા રોગાદિકં નશ્યન્તિ ઇત્યાદિકં નિખિલજિજ્ઞાસાયાઃ અન્તઃ કેવલં જ્યોતિષશાસ્ત્રં હિ કરોતિ । એતસ્માત્કારણાત્ વેદચક્ષુઃરૂપમિદં શાસ્ત્રં સર્વેષાં માનવજાતીનાં કૃતે નિતાન્તં પ્રિયમસ્તિ ।

વૈદિકસંહિતેભ્યઃ જ્યોતિઃસૂત્રં ગૃહીત્વા લગધનામા કશ્ચિત્મુનિઃ પ્રાક્ અસ્ય શાસ્ત્રસ્યોદ્ભાવનં ચકાર । તત્પ્રણિતો વેદાંગજ્યોતિષાખ્યો ગ્રન્થઃ જ્યોતિર્વિદ્યાયાઃ પ્રથમત્વેન સ્થિરીકૃતઃ । ચતુર્ણામપિ વેદાનાં પૃથક્ પૃથગ્ જ્યૌતિષશાસ્ત્રમાસીત્ । સંપ્રતિ સામવેદસ્ય જ્યોતિષં નોપલભ્યતે । ઋગ્વેદસ્ય જ્યૌતિષમ્ આર્ચજ્યૌતિષમ્, ષટ્ત્રિંશત્પદ્યાત્મકમ્ । યજુર્વેદસ્ય યાજુષજ્યૌતિષમ્, ઊનચત્વાંરિશત્પદ્યાત્મકમ્ । અથર્વવેદસ્ય આથર્વણજ્યૌતિષમ્, દ્વિષષ્ટ્યુત્તરશતપદ્યાત્મકમ્ । એતેષાં ત્રયાણાં જ્યોતિષાણાં કર્તાસ્તિ લગધાચાર્યો નિઃસન્દેહઃ । કોઽયં લગધઃ ? ઇતિ વિષયં વક્તું સંપ્રતિ ન કોઽપિ સક્ષમઃ । યદ્ભવતુ યજ્ઞવિધાનાય ઇદં શાસ્ત્રારમ્ભ ઇતિ ભાસ્કરાચાર્યેણ સ્વીકૃતમ્ । યચ્ચોક્તં સિદ્ધાન્તશિરોમણ્યાં-

“વેદાસ્તાવત્ યજ્ઞકર્મપ્રવૃત્તા યજ્ઞાઃ પ્રોક્તાસ્તે તુ કાલાશ્રયેણ । શાસ્ત્રાદસ્માત્ કાલબોધો યતઃ સ્યાત્ વેદાંગત્વં જ્યૌતિષસ્યોક્તમસ્માત્ ”॥ ઇતિ જ્યોતિષશાસ્ત્ર પ્રવર્તકાઃ સૂર્યાદયોઽષ્ટાદશ ઋષયઃ સ્મર્યન્તે । યદુક્તં કાશ્યપસંહિતાયાં નામાનિ-

“સૂર્યઃ પિતામહો વ્યાસો વસિષ્ઠોઽત્રિઃ પરાશરઃ ।
કશ્યપો નારદો ગર્ગો મરીચિર્મનુરંગિરાઃ ॥

રોમશઃ પૌલિશશ્ચૈવ ચ્યવનો યવનો ભૃગુઃ ।
શૌનકોઽષ્ટાદશાશ્ચૈતે જ્યોતિઃશાસ્ત્રપ્રવર્તકાઃ ”॥

ઇતિ । શાસ્ત્રમિદમતિપુરાતનમસ્તિ । અસ્ય શાસ્ત્રસ્ય મૂલબીજાનિ વેદેષુ દૃષ્ટાનિ ભવન્તિ । તત્ર- “એકા ચ મે તિસ્રશ્ચ મે પઞ્ચ ચ મે સપ્ત ચ મે” “પ્રાતઃ જુહોતિ, સાયં જુહોતિ” (તૈ૦આ૦-૨/૧/૨) “એકાષ્ટકાયાં વીક્ષેરન્ ફાલ્ગુનીપૂર્ણમાસે દીક્ષેરન્” (તા૦બ્રા૦-૫/૯/૧૭) ઇત્યાદિષુ મન્ત્રેષુ ગણિતાદિસિદ્ધાન્તાનાં વર્ણનં મિલતિ ।

વેદાંભૂતસ્ય જ્યોતિર્વિજ્ઞાનસ્ય સાહિત્યં તુ અતીવ વિશાલમ્ । વેદાંગજ્યૌતિષસ્ય પશ્ચાત્ યે આચાર્યાઃ અસ્મિન્ શાસ્ત્રે કૃતભુરિપરિશ્રમાઃ કૃતાસ્તેષુ વરાહમિહિરઃ, આર્યભટ્ટઃ, બ્રહ્મગુપ્તઃ, લલ્લાચાર્યઃ, ઉત્પલાચાર્યઃ, શ્રીપતિઃ, ભોજદેવઃ, ભાસ્કરાચાર્યઃ, કેશવઃ, ગણેશદૈવજ્ઞઃ, જ્ઞાનરાજઃ, કમલાકરાદયશ્ચ ઉદીયમાના ભવન્તિ । ઇમે આચાર્યાઃ જ્યોતિશ્શાસ્ત્રસમ્બન્ધીયાન્ ઉત્તમોત્તમાન્ ગ્રન્થાન્ વિરચિતવન્તઃ । આર્ષેષુ અષ્ટાદશાચાર્યાઃ સિદ્ધાન્તગ્રન્થાઃ કૃતવન્તઃ । એતદતિરિક્તાઃ ગૌરીજાતકાદિ દૈવગ્રન્થાઃ, પરાશર-જૈમિનીકૃતાઃ આર્ષગ્રન્થાઃ, વરાહમિહિરાદિકૃતાઃ પૌરુષગ્રન્થાઃ દૃષ્ટિપથે વિલસન્તિતમામ્ ।

શાસ્ત્રમિદં સંહિતાગણિતજાતકાખ્યેષુ ત્રિષુ ભાગેષુ આત્માનં પ્રકટીચકાર । યજ્ઞાદીનાં પ્રાકૃતવિધાનં સમુચિતકાલે કરણીયમિતિ નિર્દિશ્ય શાસ્ત્રોદ્ભાવનં સર્વાદૌ વેદેષુ નિહિતમ્ । યજ્ઞવિધાનસ્ય ઉપયુક્તં કાલં નિર્દિશતિ જ્યોતિષમ્ । એતસ્માદસ્ય કાલવિધાયકમિતિ નામાન્તરં શ્રૂતમ્ । યદુક્તમસ્ય મહિમ્નિ-

"વેદસ્ય નિર્મલં ચક્ષુઃ જ્યોતિશ્શાસ્ત્રમકલ્મષમ્ ।
વિનૈતદખિલં શ્રૌતં સ્માર્તં કર્મ ન સિદ્ધ્યતિ" ॥

ઇતિ । જ્યોતિષશાસ્ત્રસ્ય વિષયાસ્ત્રયઃ । તન્ત્રં સંહિતા હોરા ચેતિ । સિદ્ધાન્તો નામ તન્ત્રમ્ । ઇદં ગણિતશાસ્ત્રં બીજગણિતં પાટીગણિતભેદેન દ્વિવિધં ગ્રહગતિસમ્બન્ધીતમ્ । હોરા તુ જાતક-તાજિકભેદેન દ્વિવિધા । ઇયમેવ ફલિતજ્યોતિષનામ્ના પરિચિતા । સંહિતાગ્રન્થઃ કાલચક્રં વિવૃણોતિ, મુહૂર્તાદિવિષયાન્ ઉત્થાપયતિ । તત્ર સિદ્ધાન્તગ્રન્થેષુ આર્ષત્વેન સૂર્યસિદ્ધાન્તઃ પ્રસિદ્ધઃ । પશ્ચાત્ આર્યભટ્ટસ્ય આર્યભટીયમ્, લલ્લસ્ય શિષ્યધીવૃદ્ધિદતન્ત્રમ્, વરાહમિહિરસ્ય પઞ્ચસિદ્ધાન્તિકા, બ્રહ્મગુપ્તસ્ય બ્રાહ્મસ્ફુટસિદ્ધાન્તઃ, શ્રીપતેઃ સિદ્ધાન્તશેખરઃ,ભાસ્કરસ્ય સિદ્ધાન્તશિરોમણિઃ, ગણેશસ્ય ગ્રહલાઘવમ્, કમલાકરસ્ય સિદ્ધાન્તતત્ત્વવિવેકઃ, શતાનન્દસ્ય ભાસ્વતિઃ, સામન્તચન્દ્રશેખરસ્ય સિદ્ધાન્તદર્પણઃ પ્રમુખાઃ સૈદ્ધાન્તિકા ગ્રન્થાઃ । હોરાગ્રન્થેષુ બૃહત્પરાશરહોરા આર્ષત્વેન સુવિદિતા । વરાહસ્ય બૃહજ્જાતકમ્, વૈદ્યનાથસ્ય જાતકપારિજાતઃ, નીલકંઠસ્ય તાજિકનીલકંઠી, જીવનાથસ્ય ભાવકુતૂહલમ્, ગણેશસ્ય જાતકાલંકારઃ પ્રધાનાઃ ગ્રન્થાઃ સન્તિ । સંહિતાતુ ભૃગુસંહિતા, કશ્યપસંહિતા, ગર્ગસંહિતા, નારદસંહિતા ચ આર્ષાઃ । વરાહસ્ય બૃહત્સંહિતા, કલ્યાણવર્મણઃ સારાવલી, નારાયણસ્ય મુહૂર્તમાર્તણ્ડઃ, રામસ્ય મુહૂર્તચિન્તામણિઃ એવં નરપતેઃ નરપતિજયચર્યા સ્વરોદયાદિ ગ્રન્થાશ્ચ માન્યાઃ પરિગણિતાઃ । એતદતિરિક્તાઃ કેરલમતપ્રતિપાદકાઃ કેચન રમલચિન્તામણિઃ રમલામૃતપ્રભૃતયો ગ્રન્થાઃ, પ્રશ્નજ્ઞાનસમ્બલિતાઃ તાજિકનીલકંઠી, તાજિકભૂષણપદ્ધતિઃ, તાજિકતન્ત્રસારપ્રભૃતયશ્ચ દૃષ્ટિપથે વિચરન્તિ । શકુનશાસ્ત્રં સંહિતાસ્કન્ધભૂતમ્ । અપિ ચ હસ્તરેખાદિસમ્બલિતં સામુદ્રિકશાસ્ત્રં સ્વરશાસ્ત્રં, શિલ્પકલાસંયુક્તં વાસ્તુશાસ્ત્રમપિ જ્યોતિર્વિજ્ઞાનેષુ ઉપનિવદ્ધા અન્તર્ભૂતાઃ દૃશ્યન્તે । નિષ્કર્ષમેતત્ ઇદં વિજ્ઞાનં પ્રથમં બ્રહ્મણા યજ્ઞપ્રવર્તનાય સૃષ્ટમ્ । શિષ્યપરંપરાનુસારેણ બુધૈર્ગૃહીતમ્ । તદેવાર્યભટ્ટેન પ્રકાશિતં વરાહમિહિરેણ ચ વિવેચિતમિતિ શાસ્ત્રં સંપ્રતિ માનવજાતીનામશેષકલ્યાણં સાધયતિ, સાધયિષ્યતિ ચ । ઇત્યલં પલ્લવિતેન ।

— લેખકઃ - નન્દપ્રદીપ્તકુમારઃ

Written by Dr. Pradipta Kumar Nanda, Kendrapara, Orissa pknanda65 at gmail.com

*Jyotirvidya Vivekah*
pdf was typeset on May 14, 2021

Please send corrections to *sanskrit@cheerful.com*